Vakya Vritti

Vakya Vritti

सर्गस्थितिप्रलयहेतुमचिन्त्यशक्तिं विश्वेश्वरं विदितविश्वमनन्तमूर्त्तिम्।
निर्मुक्तबंधनमपारसुखांबुराशिं श्रीवल्लभं विमलबोधघनं नमामि।। १
यस्यप्रसादादहमेव विष्णुः मययेव सर्वं परिकल्पितं च।
इत्थं विजानामि सदात्मरूपं तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यम्।। २
तापत्रयार्कसंतप्तः कश्चिदुद्विग्नमानसः।
शमादिसाधनैर्युक्तः सद्गुरुं परिपृच्छति।। ३
शिष्य उवाच
अनायासेन येनास्मान् मुच्येयः भवबन्धनात्।
तन्मे संक्षिप्य भगवन् कैवल्यं कृपया वद।। ४
श्रीगुरुरुवाच
साध्वी ते वचनव्यक्तिः प्रतिभाति वदामि ते।
इदं तदिति विस्पष्टं सावधानमनाः श्रुणु।। ५
तत्वमस्यादिवाक्योत्थं यज्जीवपरमात्मनोः।
तादात्म्यविषयं ज्ञानं तदिदं मुक्तिसाधनम्।। ६
शिष्य उवाच
को जीवः कः परश्चात्मा तादात्म्यं वा कथं तयोः।
तत्वमस्यादिवाक्यं वा कथं तत्प्रतिपादयेत्।। ७
श्रीगुरुरुवाच
अत्र ब्रूमः समाधानं कोऽन्यो जीवस्त्वमेव हि।
यस्त्वं पृच्छसि मां "कोऽहम्" "ब्रह्मैवासि" न संशयः।। ८
शिष्य उवाच
पदार्थमेव जानामि नाद्यापि भगवन् स्पुटम्।
अहं ब्रह्मेति वाक्यार्थं प्रतिपद्ये कथं वद।। ९
श्रीगुरुरुवाच
सत्यमाह भवानत्र विज्ञानं नैव विद्यते।
हेतुः पदार्थबोधो हि वाक्यार्थावगतेरिह।। १०
अन्तःकरणतद्वृत्तिसाक्षी चैतन्यविग्रहः।
आनन्दरूपः सत्यः सन् किं नात्मानं प्रपद्यसे।। ११
सत्यानन्दस्वरूपं धीसाक्षिणं बोधविग्रहं।

चिन्तयाऽऽत्मतया नित्यं त्यक्त्वा देहादिगां धियम्।। १२
रूपादिमान्यतः पिण्डस्ततो नात्मा घटादिवत्।
वियदादिमहाभूतविकारत्वाच्च कुम्भवत्।। १३
शिष्य उवाच
अनात्मा यदि पिण्डोऽयमुक्तहेतुबलान्मतः।
करामलकवत्साक्षादात्मानं प्रतिपादय।। १४

त्वंपदलक्ष्यार्थः

श्रीगुरुरुवाच
घटद्रष्टा घटाद्भिन्नः सर्वथा न घटो यथा।
देहद्रष्टा तथा देहो नाहमित्यवधारय।। १५
एवमिन्द्रियदृङ् नाहमिन्द्रियाणीति निश्चिनु।
मनो बुद्धिस्तथा प्राणो नाहमित्यवधारय।। १६
संघातोऽपि तथा नाहमिति दृश्यविलक्षणम्।
द्रष्टारमनुमानेन निपुणं संप्रधारय।। १७
देहेन्द्रियादयो भावा हानादिव्यापृतिक्षमाः।
यस्य सन्निधिमात्रेण सोऽहमित्यवधारय।। १८
अनापन्नविकारः सन्नयस्कांतवदेव यः।
बुद्ध्यादींश्चालयेत् प्रत्यक् सोऽहमित्यवधारय।। १९
अजडात्मवदाभान्ति यत्सान्निध्याज्जडा अपि ।
देहेन्द्रियमनः प्राणाः सोऽहमित्यवधारय।। २०
अगमन्मे मनोऽन्यत्र सांप्रतं च स्थिरीकृतम्।
एवं यो वेत्ति धीवृत्तिं सोऽहमित्यवधारय।। २१
स्वप्नजागरिते सुप्ति भावाभावौ धियां तथा
यो वेत्त्यविक्रियः साक्षात् सोऽहमित्यवधारय।। २२
घटावभासको दीपो घटादन्यो यथेष्यते।
देहावभासको देही तथाऽहं बोधविग्रहः।। २३
पुत्रवित्तादयो भावा यस्य शेषतया प्रियाः।
द्रष्टा सर्वप्रियतमः सोऽहमित्यवधारय।। २४
परप्रेमास्पदतया मा न भूवमहं सदा।
भूयासमिति यो द्रष्टा सोऽहमित्यवधारय।। २५

यः साक्षिलक्षणो बोधस्त्वंपदार्थः स उच्यते।
साक्षित्वमपि बोद्धृत्वमविकारितयाऽऽत्मनः।। २६
देहेन्द्रियमनःप्राणाहंकृतिभ्यो विलक्षणः।
प्रोज्झिताशेषषड्भावविकारस्त्वंपदभिधः।। २७
त्वमर्थमेव निश्चित्य तदर्थं चिन्तयेत्पुनः।
अतद्व्यावृत्तिरूपेण साक्षाद् विधिमुखेन च २८

तत्पदलक्ष्यार्थः

निरस्ताशेषसंसारदोषोऽस्थूलादिलक्षणः।
अदृश्यत्वादिगुणकः पराकृततमोमलः।। २९
निरस्तातिशयानन्दः सत्यप्रज्ञानविग्रहः।
सत्तास्वलक्षणः पूर्णः परमात्मेति गीयते। ३०
सर्वज्ञत्वं परेशत्वं तथा संपूर्णशक्तिता।
वेदैः समर्थ्यते यस्य तद्ब्रह्मेत्यवधारय।। ३१
यत्-ज्ञानात् सर्वविज्ञानं श्रुतिषु प्रतिपादितम्।
मृदाद्यनेकदृष्टान्तैस्तद्ब्रह्मेत्यवधारय।। ३२
यदानन्त्यं प्रतिज्ञाय श्रुतिस्तत्सिद्धये जगौ।
तत्कार्यत्वं प्रपञ्चस्य तद्ब्रह्मेत्यवधारय।। ३३
विजिज्ञास्यतया यच्च वेदान्तेषु मुमुक्षुभिः।
समर्थ्यतेऽतियत्नेन तद्ब्रह्मेत्यवधारय।। ३४
जीवात्मना प्रवेशश्च नियंतृत्वं च तान् प्रति।
श्रूयते यस्य वेदेषु तद्ब्रह्मेत्यवधारय।। ३५
कर्मणां फलदातृत्वं यस्यैव श्रूयते श्रुतौ।
जीवानां हेतुकर्तृत्वं तद्ब्रह्मेत्यवधारय।। ३६

महावाक्यार्थः

तत्वंपदार्थौ निर्णीतौ वाक्यार्थश्चिन्त्यतेऽधुना।
तादात्म्यमत्र वाक्यार्थस्तयोरेव पदार्थयोः। ३७
संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र संमतः।
अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः। ३८
प्रत्यग्बोधो य आभाति सोऽद्वयानन्दलक्षणः।

अद्वयानन्दरूपश्च प्रत्यग्बोधैकलक्षणः।। ३९
इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत्।
अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि।। ४०
तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः श्रुणु।
पूर्णानन्दैकरूपेण प्रत्यग्बोधोऽवतिष्ठते।। ४१
तत्वमस्यादिवाक्यं च तादात्म्यप्रतिपादने।
लक्ष्यौ तत्वंपदार्थौ द्वौ उपादाय प्रवर्त्तते।। ४२
हित्वा द्वौ शबलौ वाच्यौ वाक्यं वाक्यार्थबाधने।
यथा प्रवर्त्ततेऽस्माभिः तथा व्याख्यातमादरात्।। ४३

तत्वंपदयोः वाच्यार्थः

आलंबनतया भाति योऽस्मत्प्रत्ययशब्दयोः।
अन्तःकरणसंभिन्नबोधः स त्वं पदाभिधः।। ४४
मायोपधिर्जगद्योनिः सर्वज्ञतादिलक्षणः।
पारोक्ष्यशबलः सत्याद्यात्मकस्तत्पदाभिधः।। ४५

लक्षणावृत्तिः

प्रत्यक्परोक्षतैकस्य सद्वितीयत्वपूर्णता।
विरुध्येते यतस्तस्माल्लक्षणा संप्रवर्त्तते।। ४६
मानान्तरनिरोधे तु मुख्यार्थस्यापरिग्रहे।
मुख्यार्थेनाविनाभूते प्रतीतिर्लक्षणोच्यते।। ४७
तत्वमस्यादिवाक्येषु लक्षणा भागलक्षणा।
सोऽयमित्यादिवाक्यस्थपदयोरिव नापरा।। ४८

वाक्यार्थे निष्ठा तस्य फलं च

अहं ब्रह्मेति वाक्यार्थबोधो यावद् दृढो भवेत्।
शमादिसहितस्तावद् अभ्यसेच्छ्रवणादिकम्।। ४९
श्रुत्याचार्यप्रसादेन दृढो बोधो यदा भवेत्।
निरस्ताशेषसंसारनिदानः पुरुषस्तदा।। ५०
विशीर्णकार्यकरणे भूतसूक्ष्मैरनावृतः।
विमुक्तकर्मनिगडः सद्यः एव विमुच्यते।। ५१
प्रारब्धकर्मवेगेन जीवन्मुक्तो यदा भवेत्।
किंचित्कालमनारब्धकर्मबंधस्य संक्षये।। ५२

निरस्तातिशयानन्दं वैष्णवं परमं पदम्। पुनरावृत्तिरहितं कैवल्यं प्रतिपद्यते।। ५३